International Journal of Advanced Academic Studies 2020; 2(1): 321-322




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
**Impact Factor:** RJIF 5.12
IJAAS 2020; 2(1): 321-322
Received: 08-11-2019
Accepted: 11-12-2019

**रमा कुमारी**
शोधार्थी, साहित्य विभाग, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**रमा कुमारी**
शोधार्थी, साहित्य विभाग, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# पं० सुरेन्द्र झा सुमन महोदयस्य शिक्षा क्षेत्रे योगदानम्

**रमा कुमारी**

**प्रस्तावना**

सुमनजीमहोदयस्य पिता बाल्यावस्थायामेवा अनेके श्लोकाः, नीतिवचनानि च अभ्यासितः। मात्र रामायणस्य महाभारतस्य च अनेके कथाज्ञानं कारितवती। शुभदिने विधिपूर्वके च अस्य अक्षरारम्भोऽभूत्। प्राथमिकशिक्षायाः क्रमे फारसीभाषायाः ज्ञानमपि प्राप्तवान्। तेषां रुचिः पठने खेलने च समानः आसीत्। अस्य उपनयन संस्कारः शुभमुहूर्ते शुभदिने च संजातः। उपनयनावसरे कोइलखग्रामवास्तव्यः पं0 अनिरुद्ध झाऽपि समागतः। सः बालकस्य अपूर्वसंस्कारं दृष्ट्वा कोइलखसंस्कृतविद्यालये संस्कृतपठनाय निवेदितः। निवेदनं स्वीकृत्य तस्य पित्र मात्र च पुत्रं प्रति स्नेहं त्यज्य निवृतिं प्राप्य आबूतः भगिनि चेति अभिभावकत्वे पठनाय कोइलखं सम्प्रेषितः।

कोइलखस्थ भद्रकालीसंस्कृतविद्यालये प्रथमायां सुमनजीमहाभागस्य नामांकनमभूत्। पं. जयसिंहठाकुरेण संस्कृता ध्ययनस्य आरम्भोऽभूत्। तदानीमेव काशीकान्तमिश्रः स्वमातृककोर्थु ग्रामात् पठनाय स्वकीयग्रामं कोइलख सम्प्राप्य संस्कृतं पठति स्म। तस्मिन् समये तत्र काञ्चीनाथ झा 'किरण', जयदेव मिश्रश्चेति पठितः। एवञ्च काञ्चीनाथ झा जयदेवामिश्रश्च सुमनस्य मित्रमिवाचरति।

सुरेन्द्र झा सुमनस्य जन्मजातप्रतिभा, कोइलख ग्रामस्य शैक्षणिकवातावरणं, सुयोग्य गुरुना प्राप्तं ज्ञानं च प्रथमापरीक्षायां प्रथमश्रेण्यां प्रथमस्थानं प्राप्तवान्। प्रथमा–परीक्षाफलेन प्रोत्साहितं भूत्वा पाटलिपूत्रमागत्य म0 म0 हरिहर कृपालु द्विवेदी महोदयस्य संरक्षणे तस्यैव विद्यालये अध्ययनं कृतवान्। परन्तु पुष्पपुरस्य वातावरणं प्रतिकूलमनुभूय तस्य पिता राजनगरस्य रमेश्वरी विद्यालये पं. सहदेव झा महोदयस्य सान्निध्यं दतवान्। अत्र आचार्यात् सदाचार ग्रहणं पूर्वकं, व्याकरणं, साहित्यञ्च अधीतवान्। अध्ययनस्य प्रभावेन सुमनजी मध्यमा परीक्षायामपि प्रथमं स्थानं लब्ध्वा छात्रवृत्तिं प्राप्तवान्।

1928 ईस्वीये धर्मसमाज संस्कृत महाविद्यालय मुजफ्फरपुरम् सः आगतः। तत्र कविशेखर पं. बदरीनाथ झा महोदयात् साहित्यशास्त्रं पठितवान्। तदानीमेव संस्कृत–कवितायाः लेखानारम्भः कृतः। साहित्य–शास्त्रीपरीक्षायाः सिद्धताक्रमे सुमनः 1929 ईस्वीये कोलकातानगरं गत्वा बंगालस्य प्रसिद्ध काव्य–तीर्थ परीक्षां दतवान्। तस्मिन् परीक्षायामपि तेन प्रथमस्थानं प्राप्तवान्। 1930 ईस्वीये साहित्यशास्त्री अपि च 1932 इस्वीये साहित्याचार्यपरीक्षां दत्वा प्रथमस्थानं लब्धवान्।

सुमनजी महोदयः यदा आचार्यकक्षायामासीत् तदानीमेव काव्यशास्त्रीयग्रन्थस्य काव्यदीपिकायामि संस्कृते 'स्नेहवर्षिणी' नामिका टीका लिखितवान्। एवञ्च सुमनजी छात्रजीवने शास्त्रमर्मज्ञः, कविः, व्याख्याकाररूपेण च पूर्णख्यातिः प्राप्तवान्। तदनु विद्यालयीय शिक्षां विरम्य गृहस्थाश्रमं प्रविश्य स्वाध्याये सारस्वतसाधने च निरतोऽभूत्।

सुरेन्द्र झा सुमनस्य अभिरुचिं पत्रकारिताक्षेत्रे किशोरावस्थातः आसीत्। यदा राजनगरविद्यालये पठतिस्म तदा त्रिवेणी नामक पत्रिकायाः हस्तलिखित प्रतिप्रकाशितः। धर्मसमाजसंस्कृत महाविद्यालय मुजफ्फरपुरे स्व मित्रे पं. रामचन्द्र मिश्रः, पं. ब्रजकिशोर नारायणजी महोदयाभ्यां सह 'जागृति' नामका पत्रिका प्राब्धवान्। पं0 श्री सुरेन्द्र झा सुमनस्य संस्कृत–हिन्द–मैथिली भाषायाञ्च समानाधिकारः आसीत्। अतः त्रिभाषास्वपि पत्रिका–प्रकाशनस्य प्रयासः सुमनजीमहोदयः करोति स्म। फलतः कालानन्तरं सः प्रसिद्ध सम्पादकरूपेण ख्यापितः।

मगनाश्रमः, मझौलियातः प्रकाशित 'क्रान्तिका' सम्पादने अस्य विशिष्ट प्रतिभा समाजे प्रख्यापितः। राजदरभङ्गायाः सुप्रसिद्ध साप्ताहिक पत्रिका मिथिला मिहिरस्य प्रधान सम्पादकरूपेण सुप्रतिष्ठितः। अवसरोऽयं मैथिल महासभायाः सम्मेलने 1934 ईस्वीये रोसड़ानगरे वैदुष्यवलेन प्रभाविते सति म.म. डॉ. सर गङ्गानाथ झा, कुमार गङ्गानन्द सिंह, पं. बलदेव मिश्रश्च 1935 ईस्वीये गङ्गादशहारादिने दरभंगाराजसेवायां प्रधानसम्पादकरूपेणाबसरः लब्धः। 1935 ईस्वीतः 1954 ईस्वीपर्यन्तं सुमनः मिथिला मिहिरस्य यशस्वीसम्पादकत्वेन सुप्रतिष्ठितः।

मिथिलामिहिरस्य सम्पादनावधेः 1948 ईस्वीये सुमनजी स्वयमेव 'स्वदेश' नामिका मासिकपत्रिकायाः षड् अङ्काः प्रकाशितोऽभूत्। 1954 ईस्वीये 'मिथिला मिहिरस्य' प्रकाशनमवरूद्धम्। तदनन्तरं स्वदेशमासिकपत्रिका दैनिकरूपेण प्रकाशितः। अपि च 1954 ई0 तः 1967 ई. पर्यन्तम् 'वैदेही' नामक पत्रिकायाः सम्पादकमण्डलस्य वरिष्ठसदस्यत्वेन सहभाजितः। सुमनजी वाराणस्यां छात्रधिवेशनस्य अध्यक्षत्वं स्वीकृतवान्।

पं. सुरेन्द्र झा सुमन महोदयस्य ध्येयो मात्रं मिथिला मैथिल–मैथिलीभाषायाश्च विकासः आसीत्। पत्रकारितां प्रति प्रकृष्टानुरागकारणतः 1978 ईस्वीये सः स्व–आवासं 'मैथिल मन्दिर' नाम्ना कृतः। अपि च मिथिला प्रेस संस्थाप्य मासिकरूपेण दैनिकरूपेण च 'स्वदेशस्य' प्रकाशिताः। दरभङ्गाप्रेसतः अनेके ग्रन्थाः सः प्रकाशनमारबधरवान् ।

अध्ययन क्षेत्रे सः नैतिकादर्शः स्थापितः तद्यथा–
'तं सन्तः श्रोतुमहंन्ति सदसद् व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा।।'
''औचित्यान्वयरक्षा च यथाशक्ति विधीयते।
कथारसाविघातेन काव्यांशस्य च योजना।।''

एवमेव अध्ययने अलंकारस्य शास्त्रीयादर्शः सुप्रतिष्ठापितः। यथा –

### अलंकार प्रशस्ति

बिनोत्कर्षापकर्षाभ्यां स्वदंतेऽर्थान्न यातुचित्
तदर्थमेव कवयोऽलंकारान्पर्युपासते।
– महिमभट्ट

अलंकारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्।
उपमा कविवंशस्य मातैवेति मतिर्मम।।
– केशव मिश्र

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।।
रञ्जयति काव्यरत्रे नृत्यन्ती तद्विदां चेतः।
– अप्पय्ययीक्षित

सर्वालंकारसर्वस्वं कविकीर्तिविवर्धिनी।
उत्प्रेक्षा हरित स्वान्तमचिरोढा–स्मितादिव।।
– केशव मिश्र अलंकारशेखर

अपह्नुत्यान्यालंकारलावण्यातिशयश्रियः।
उत्प्रेक्षा प्रथमोल्लोबजीवितत्वेन जृम्भते।।
– कुन्तक

विवक्षा या विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिः स्यादलंकारोत्तमा मता।।
– दण्डी

'तावत् कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते।।'
'अभ्योसेनात्मनो योगी धारयेदचलं मनः।'
'सांख्येन सर्वभावानां प्रतिलोमानुलोमतः।
भवाप्ययावनुध्यायेन्मनो यावत् प्रसीदति।।'
'यत्कर्मभिर्यत्तपसा ज्ञान–वैराग्यतश्च यत्...
सर्वमद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा।।'

''नव रसमिलितं वा केवलं वा पुमर्थं
परममिह मुकुन्दे भक्तियोगं वदन्ति''

पं0 सुरेन्द्र झा सुमनस्य रुचिः अध्यापनेऽपि प्रारम्भिकावस्थातः आसीत्। पूर्वं परम्परा आसीत् यत् श्रेष्ठछात्रं कनिष्ठ छात्रं पाठयति स्म। सः पिताद्वारा स्थापित राधाकान्त मिडिल इंगलिश विद्यालये अध्यापितः। पुनश्च मुजफ्फरपुरस्य मनियारीनगरस्थित महन्त दर्शनदास हाई इंगलिश विद्यालये 1937 ईस्वीये षड् मासपर्यन्तं मुख्यपण्डितरूपेणाध्यापितः। 1953 ईस्वीये अनिवार्ययोग्यताभावेऽपि चन्द्रधारी महाविद्यालयः, दरभङ्गायाम् प्राध्यापकपदे विश्वविद्यालयेन नियुक्तः। प्रो. ईशनाथ झा महोदयस्य देहावसानान्तरं 1965 ईस्वीये मैथिली विभागाध्यक्षपदेऽऽसीनोऽभूत्। पदेऽस्मिन् 1971 ई. पर्यन्तमध्यापितः। 1972 ईस्वीये रीडरपदे प्रोन्नतिं प्राप्य ल. ना. मि. वि. विद्यालयस्य स्नातकोत्तर विभागे मैथिली विषये विभागाध्यक्ष पदमलङ्कृतम्। 1975 ई0 विश्वविद्यालय सेवातः निवृतोऽभूत्।
आचार्य सुरेन्द्र झा सुमनस्य अध्यापने 'आचार्यः आचारं ग्राह्यति, आचिनोति अर्थात्, आचिनोति बुद्धिमिति वा' इति। श्रीसुरेन्द्र झा सुमनमहोदस्य अध्यापन वैशिष्ट्यमेवं विद्यते–
ज्ञानं लब्ध्वापि संसारे यः परेभ्यो न यच्छति।
ज्ञान रूपी हरिस्तमै प्रसन्न इव नेक्षते।।

### संदर्भः

1. सुरेन्द्र झा सुमन, पृ0सं0 –18।